**(301SN21)**

# M.A. DEGREE EXAMINATION, OCTOBER/NOVEMBER 2024.

Third Semester

Sanskrit

## VEDIC LANGUAGE AND LITERATURE

Time : Three hours Maximum : 70 marks

1. सर्वे प्रश्नाः समाधेयाः। (20)

   (a) अग्निसूक्तस्य ऋषिः कः?

   (b) 'अग्नेयं यज्ञमध्वरं विश्वतः' इत्यत्र अध्वर पदस्यार्थः कः?

   (c) यः शम्बरं पर्वतेषुक्षियन्तं – अत्र शम्बर पदं व्याख्यात।

   (d) वरुणः कीदृशः?

   (e) उषा नयसि किं करोति?

   (f) 'सप्तास्यासन् परिधयः' – अत्र अर्थविवरणं कुरुत।

   (g) कालसूक्तस्य ऋषिः कः?

   (h) मेधाजननसूत्तस्य देवताविशेषान् लिखत।

   (i) किमिनाशन सूक्ते के के विषयाः वर्णिताः।

   (j) दीर्घायुसूक्तस्य विनियोगः कस्मिन् विषये भवति।

2. चत्वारि प्रश्नाः समाधेयाः। (20)

   (a) इन्द्रस्यपराक्रमविशेषान् संगृह्णीत।

   (b) रात्रि सूक्तस्य महत्वं विवृणुत।

   (c) पुरुषसूक्तयज्ञस्वरूपं वर्णयत।

   (d) 'देवतानां मध्ये अग्निः प्रधानः' समर्थयत।

   (e) कालसूक्तस्य सारांशं लिखत।

   (f) राष्ट्रसभायाः विशेषान् लिखत।

(g) सत्यानृतसमीक्षकस्य स्वभावं विशदयत।

(h) क्रिमिनाशनसूक्तस्य भावं लिखत।

3. द्वौ प्रश्नौ समाधेयौ। (15)

(a) अग्नेः वैशिष्ट्यं निरूपयत।

(b) ऋग्वेदानुसारं वरुणस्य स्वभावं प्रपञ्चयत।

(c) मेधाजननसूक्तस्य सारांशं लिखत।

(d) दीर्घायुप्राप्तिः कथं शक्यते? निरूपयत।

4. मन्त्रद्वयं व्याख्यात। (15)

(a) उद्यन्नादित्यः क्रिमीन् हन्तु
निम्रोचन् हन्तु रश्मिभिः।
ये अन्तः क्रिमयो गवि।

(b) कालः प्रजा असृजत
कालो अग्रे प्रजापतिम्।
स्वयम्भूः कश्यपः कालात्
तपः कालादजायत।

(c) तं यज्ञं बर्हिषि, प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवा अयजन्त, साध्या ऋषयश्च ये।

(d) अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि।
स इद्देवेषु गच्छति।

**(302SN21)**

M.A. DEGREE EXAMINATION,
OCTOBER/NOVEMBER 2024.
Third Semester
Sanskrit
HISTORY OF SANSKRIT LITERATURE
AND LINGUISTICS

Time : Three hours Maximum : 70 marks

1. सर्वे प्रश्नाः समाधेयाः। (20)

(a) यजुर्वेदसंहितायाः स्वरूपं लिखत।

(b) ऋग्वेदस्य विभागः कलिधा वर्तते?

(c) ब्राह्मणं किम्?

(d) अग्नेः वैशिष्ट्यं लिखत?

(e) पुरुषसूक्ते प्रधानतया को विषयः अस्ति।

(f) साहित्यिकदृष्ट्या सर्वाधिक समृद्ध भाषा-परिवारः कः।

(g) टवर्गस्य रकारस्य च उच्चारणस्थानम् किम्?

(h) संस्कृतभाषायां अन्तस्थवर्णाः कति? के?

(i) आकृतिमूलक वर्गीकरणे प्रधानविषयः कः?

(j) ध्वनिविज्ञानम् किम्?

2. चत्वारप्रश्नाः समाधेयाः (20)

(a) वेदानां महत्त्वं लिखत।

(b) विविधमत पर्यालोचनप्रकारं वेदरचनाकालं विशदयत।

(c) अथर्ववेदस्य विषयमधिकृत्य लिखत।

(d) वेदस्य कथमपौरुषेयत्वमभिधीयते।

(e) भाषाशास्त्राध्ययनस्य प्रयोजनानि लिखत।

(f) ध्वनिवर्गीकरणे वाहयप्रयत्नं विशदयत।

(g) ध्वनिनियमः कः? ग्रिमनियममधिकृत्य लिखत।

(h) पारिवारिकं भाषावर्गीकरणं विशदयत।

3. द्वौ प्रश्नौ समाधेयौ (20)

(a) उपनिषत्सु प्रतिपादितं वस्तुविषयमधिकृत्य लिखत।

(b) वेदाङ्गानि कति भवन्ति। शिक्षायाः स्वरूपं सोदाहरणपूर्वकं विशदयत।

(c) विविधमतानुसारं भाषायाः प्रादुर्भावप्रकारं प्रपञ्चयत।

(d) भारोपीयभाषाकुटुम्ब भाषाणां लक्षणानि लिखत।

4. पञ्चानां लघुटिप्पणीर्लिखत। (10)

(a) व्याकरणम्।

(b) सामसंहिता।

(c) ब्राह्मणग्रन्थाः।

(d) सायणः।

(e) वरूणः।

(f) अर्थविस्तारः।

(g) प्राकृतभाषाः

(h) ध्वनि परिणामविषयः।

(i) ग्रासमान् नियमः।

(j) भाषाशास्त्रपण्डिताः।

**(303SN21)**

M.A. DEGREE EXAMINATION,
OCTOBER/NOVEMBER 2024.

Third Semester

Sanskrit

DARSANAS

Time : Three hours Maximum : 70 marks

1. सर्वे प्रश्नाः समाधेयाः। (20)

(a) सांख्यमते दुःखत्रयं किम्?

(b) पुरुषः कः?

(c) "त्रिविधं प्रमाणमिष्टं" – विवृणुत।

(d) 'पंग्वंधवदुभयोः' – व्याख्यात।

(e) अन्तः करणत्रयं तद्वृत्तिं विशदयत।

(f) वैशिषिकमते पदार्थाः कति?

(g) जैमनीये धर्म लक्षणं किम्?

(h) "सिद्धान्तस्तु चतुर्भेदः" – निरूपयत।

(i) "पंचविंशतितत्त्वानि सांख्यस्यैव" – विशदयत।

(j) अर्थापत्तिं निरूपयत।

2. चत्वारः प्रश्नाः समाधेयाः। (20)

(a) सांख्यानुसारं पुरुषबहुत्वं साधयत।

(b) सांख्यानुसारं गुणानां लक्षणानि वर्णयत।

(c) कथं जडायाः प्रकृतेः प्रकृतिः सम्भवति?

(d) सतामपि पदार्थानामनुपलब्धौ कानि कारणानि सन्ति?

(e) निग्रहस्थानानि निरूपयत।

(f) न्यायमतानुसारं मोक्षस्वरूपं प्रतिपादयत।

(g) लिङ्गशरीरस्यावश्यकतां प्रदर्श्य निमित्तनैमित्तिकानि निरूपयत।

(h) पूर्वमीमांसानुसारं प्रमाणानि कति? विवृणुत।

3. एकः प्रश्नः समाधेयः। (15)

(a) न्यायदर्शानुसारं हेत्वाभासवैविध्यं सोपपत्तिकं प्रपञ्चयत।

(b) सांख्यमते सत्कार्यवादः सयुक्तिकं सप्रमाणं समर्थनीयः।

4. एकः प्रश्नः समाधेयः। (15)

(a) सांख्यानुसारं प्रत्ययसर्गस्वरूपं लिखत।

(b) न्यायमतानुसारं प्रमाणनिरूपणं कुरुत।

---

M.A. DEGREE EXAMINATION,
OCTOBER/NOVEMBER 2024.

Third Semester

Sanskrit

POETICS AND AESTHETICS (V)

Time : Three hours Maximum : 70 marks

सर्वे प्रश्नाः समाधेयाः।

1. सर्वे प्रश्नाः समाधेयाः। (20)

(a) जगन्नाथस्य पाण्डित्यं विशदयत।

(b) जगन्नाथमतानुसारं काव्यलक्षणम् लिखत।

(c) काव्यकारणं किम्?

(d) रसविषये जगन्नाथस्याभिप्रायः कः?

(e) जगन्नाथमते काव्यविभागः कति प्रकारः?

(f) व्यङ्ग्यार्थः कः।

(g) वाच्यार्थः कः?

(h) ध्वनेः स्वरूपं किम्?

(i) साहित्ये ध्वन्यालोकस्य स्थानम्।

2. चत्वार प्रश्नाः समाधेयाः। (20)

(a) अन्ये ब्रूयुः “नास्त्येव ध्वनिः – विवृणुत।

(b) योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः – विवृणुत।

(c) भ्रम धार्म्मिक ........ विवृणुत।

(d) ध्वनेः अस्तित्वं निरूपयत।

(e) विश्वनाथकृतकाव्यलक्षणस्य खण्डनम् प्रदर्शयत।

(f) उत्तमोत्तमकाव्यस्वरूपं जगन्नाथानुसारं लिखत।

(g) "काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा इत्यत्र भावं स्पष्टयत।

(h) प्रतिभायाः हेतुत्वं निरूपयत।

3. एकः प्रश्नः समाधेयः। (15)

(a) अधमाधमकाव्यस्थानौचित्यम् निरूपयत।

अथवा

(b) दीक्षितस्यमतखण्डनम् विवृणुत।

4. एकः प्रश्नः समाधेयः। (15)

(a) समासोक्तौ ध्वनेः अन्तर्भाव – निषेधः विवृणुत।

(b) अभाववादिनां मतं खण्डयत।

---

**(305SN21)**

M.A. DEGREE EXAMINATION,
OCTOBER/NOVEMBER 2024.

Third Semester

Sanskrit

THEORIES OF RASA AND DHVANI (VI)

Time : Three hours Maximum : 70 marks

1. सर्वे प्रश्नाः समाधेयाः। (20)

(a) काव्यप्रकाशस्य मङ्गलाचरणश्लोकस्य महत्त्वं लिखत।

(b) काव्यप्रयोजनानि लिखत।

(c) शब्दः कतिविधः? विवृणुत।

(d) का नाम श्रुतार्थापत्तिः?

(e) अभिधामूलव्यञ्जना का?

(f) किं भावत्वं?

(g) पण्डितराजमते भावध्वनयश्चुस्त्रिंशत् विवृणुत।

(h) स्मृति ध्वनिः का?

(i) अर्थशकितमूलस्य द्वादशभेदाः विशदयत।

(j) जगन्नाथस्यमते भावध्वनौ किं अस्ति?

2. चत्वारः प्रश्नाः समाधेयाः। (20)

(a) रसगंगाधरमनुसृत्य भावलक्षणं भावाभिव्यक्ति प्रकारं निरूपयत।

(b) रसाभासस्वरूपं निरूपयत।

(c) भावाभासं निरूपयत।

(d) अनौचित्यं किम्? रसगङ्गाधरानुसारं विवृणुत।

(e) 'अनलङ्कृती पुनः क्वापि' काव्यलक्षणं निरूपयत।

(f) सङ्केतितार्थविषये मम्मटस्य किं मतम्?

(g) 'गौर्वहीकः' इत्यत्र का नामलक्षणा? विवृणुत।

(h) आर्थीव्यञ्जनां निरूप्य वक्तृबोद्धष्यो वैशिष्ट्याद् अन्यार्थ प्रतीतिर्यथा भवति तथा विशदीक्रियताम्।

3. एकः प्रश्नः समाधेयः। (15)

(a) "हेत्वभावान्न लक्षणा" इत्यत्र आशयः कः?

(b) 'अर्थव्यञ्जकतोच्यते' इति सूत्रेण किं ज्ञायते? अत्र ध्वनिः कथं भवति?

4. एकः प्रश्नः समाधेयः। (15)

(a) जगन्नाथमतानुसारं मध्यमकाव्यभेदान् सोदाहरणं लिखत।

(b) रसस्थायिभावयोर्भेदं निरूपयत।

---